पुराणगरिमा

श्रीमद्भागवतपुराणे अष्टाङ्गयोगविचारः

डॉ. वी. वी. अनिल्कुमार्

श्रीमद्भागवतपुराणम् अष्टादशपुराणेषु महनीयतमस्थानमलङ्करोति। वेदव्यासः सप्तदशपुराणानि विरच्यापि असन्तुष्टः अकृतार्थश्च समजनि। तदा नारदोपदेशेन इदमष्टादशं महापुराणं विरच्य आत्मनस्तुष्टिमवाप्तवान् इति ऐतिह्यन्तु अस्य पुराणस्य महत्वं प्रस्तौति। पद्मपुराणे तथा स्कन्दपुराणे च ग्रन्थस्यास्य महत्वं विलिखितं भवति। उक्तञ्च -

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियम्।
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।।
तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतम्।
तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः।। (१२-१३-१८)

ज्ञानादेवतु मुक्तिरिति अद्वैतसिद्धान्तः। चित्तशुद्ध्यर्थं भक्त्यादि साधनानि तत्र उपदिश्यन्ते। किन्तु 'तत्तु समन्वयाद्' इति न्यायेन समन्वयभावनया ज्ञानविरागभक्त्यादीनां वर्णना अस्मिन् चमत्कारित्वेन विलिखितं भवति। भक्तियुक्ताद्वैतदर्शनमेवात्र विशदीक्रियते। भक्तिरेव ज्ञानम् उत ज्ञानमेव भक्तिरिति भागवतसिद्धान्तः। सर्वेषामपि दर्शनशास्त्रीयसिद्धान्तानां समन्वयः अत्र उपलभ्यते। क्वचित् साङ्ख्यदर्शनस्य, मीमांसादर्शनस्य, योगदर्शनस्य, वेदान्तदर्शनस्य, न्यायवैशेषिकदर्शनानां च समन्वयः अस्मिन् समालोच्यते।

महापुराणेऽस्मिन् प्रतिपाद्यमाना योगविद्या बहुषु प्राचीनग्रन्थेषु प्रकाशिता इति भागवतेनैव प्रमाणीभवति। उक्तञ्च - 'बहुयोगग्रन्थसम्मतं हृदयग्रन्थिमोचनम्' (५-१५-१०) इति रहूगणजडभरतसंवादे। बहुत्र योगविद्यायाः निर्देश अस्मिन् अवलोकयितुं शक्यते। यथा द्वितीयस्कन्धे प्रथमतृतीयाध्याययोः चतुर्थस्कन्धस्य षष्ठाध्याये एकादशस्कन्धस्य त्रयोदशाध्याये तथा चतुर्दशे पञ्चदशे एकोनविंशतितमे अष्टाविंशतितमे नवविंशतितमे च अध्याये योगविद्यायाः स्वरूपं भागवतमहापुराणे प्रतिपाद्यते। तत्प्रतिपादनं च योगभक्तसाधनाभ्यासवशीकृतान् भक्तान् योगिनः चारञ्जयति। अष्टाङ्गयोगस्य चित्रणं पातञ्

जलयोगसूत्राणां प्रभावैः सुस्पष्टं प्रमाणीकरोति। तथापि क्वचित् क्वचित् ईषद्भेदः पातञ्जलयोगादुपलभ्यते। तदत्र विचार्यते।

अष्टाङ्गयोगः

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः अष्टाङ्गयोगाः। श्रीमद्भागवते तेषां स्वरूपविवरणं कथमित्यधो निरूप्यते।

यमः - अष्टाङ्गयोगस्य प्रथमाङ्गो भवति यमः। तत्स्वरूपं पातञ्जलसूत्रे एवमुक्तम् - 'अहिंसासत्यमस्तेयं ब्रह्मचर्यमपरिग्रहः एते यमाः'। एवं यमानां संख्या तत्र पञ्च भवति। किन्तु भागवतपुराणे तत्संख्या द्वादशत्वेन परिगणिता वर्तते। ते च अहिंसा, सत्यम्, अस्तेयम्, असङ्गः, ह्रीः, असञ्चयः, आस्तिक्यम्, ब्रह्मचर्यम्, मौनम्, स्थैर्यम्, क्षमा, अभयञ्च। उक्तञ्च -

अहिंसा सत्यमस्तेयं असंगो ह्रीरसञ्चयः।
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयम्।। (११-१९-३३)

अहिंसा तु मनोवाक्कायैः परपीडनराहित्यम्। सत्यं हितप्रियययथार्थभाषणम्। अस्तेयं मनसापि परस्वाग्रहणराहित्यम्। असंगो नाम आसक्तिविरहितत्वम्। ह्री तु कर्मसु जुगुप्सा। असञ्चयो विषयासङ्कल्पः। धर्मे शास्त्रोक्ते विश्वासः भवत्यास्तिक्यम्। ब्रह्मचर्यन्तु स्त्रीसङ्गराहित्यम्। मौनं नाम वाक्निग्रहः। स्थैर्यं तु धर्मे सत्यसङ्कल्पत्वम्। क्षमा तु अपराधे अपि क्रोधाभावः। अभयं तु भयरहितत्वम्।

अत्र यमेषु पतञ्जलिना अंगीकृतोऽपरिग्रहः भागवते असञ्चयनाम्ना कथितः। अन्ये सप्तयमाः नूत्ना समायोजिता भवति।

नियमाः - यमवत् नियमानामपि संख्या योगसूत्राद् भिन्नतया निरूपितं भवति भागवते। अत्र द्वादशसंख्याक नियमाः प्रदर्शिताः। ते च यथा -

शौचं जपस्तपोहोमः श्रद्धातिथ्यं मदर्चनम्।
तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम्।।

पातञ्जलयोगसूत्रे नियमाः पञ्च भवति - 'शौचसन्तोषतपःस्वाधायेश्वरप्रणिधानि नियमाः'

अत्र तु शौचं द्विविधं विद्यते। बाह्यमाभ्यन्तरं च। एवं बाह्यशौचः आभ्यन्तरशौचः जपः तपः होमः श्रद्धा आतिथ्यम् भगवदर्चनम् तीर्थाटनम् परार्थे ईहा तुष्टिः आचार्यसेवनम् चेति द्वादशनियमाः।

पतञ्जलिना स्वीकृत ईश्वरप्रणिधानं तु भगवदर्चनमितिरीत्या कथितम्। अन्ये भागवते नूतनतया निरूपिताः। इमौ यमनियमौ सकामनिष्कामेभ्यः साधकेभ्यः परमोपयोगिनौ। मुमुक्षोः यमाः मुख्याः सकामस्य नियमाः मुख्याः। यस्मात् उपासिताः सन्तः प्रवृत्तानां निवृत्तानां च यथाकामं मोक्षम् अभ्युदयं च दुहन्ति।

आसनम् - अष्टाङ्गयोगस्य तृतीयं अङ्गं भवति आसनम्। पतञ्जलिः स्थिरसुखमासनम् इति अस्य लक्षणं वक्ति। भागवते तु एवं प्रकारेणास्य स्वरूपं निर्धारयति -

गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः।
शुचौ विनिक्त आसीनो विधिवत् कल्पितासने।।
शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम्।
तस्मिन् स्वस्ति समासीन ऋजुकायः समभ्यसेत्।। इति।

आसननिरूपणावसरे 'कल्पितासन' 'विजितासन' इति शब्दयोः बहुधा प्रयोगः सन्दृश्यते। तत्कालीनानि अनेकानि आसनानि प्रचलितान्यासन् इत्यनेनानुमन्तुं शक्यते। यद्यपि अनेकानि विद्यन्ते तथापि पद्मासनस्यैव प्रामुख्यं इत्यत्र न कोऽपि संशयः। तत्र पवित्रनदीतीर्थोदकेषु प्रातःकाले सायंकाले च कृतस्नानः सन् विशुद्धः एकान्तस्थाने यथाविधि चैलाजिनकुशोत्तरमासनमास्तीर्य स्वस्तिकासनेन समासीनः स्वकीयं शरीरं स्थिरं एकाग्रमृजुञ्च विधाय आसनमभ्यसेदिति भागवतीयविधिः।

प्राणायामः - अष्टाङ्गयोगस्य चतुर्थमङ्गं भवति प्राणायामः। साधारणतया योगदर्शने पूरककुंभकरेचकैः क्रमेण प्राणानां शोधनविधिः निर्दिष्टः। किन्त्वत्र विपर्ययेण रेचकपूरककुम्भकैः अपि प्राणसंशोधनविधिः निरूप्यते। यथा -

प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः।
प्रतिकूलेन वा चित्तं यथा स्थिरमचञ्चलम्।।
विपर्ययेणापि शनैरभ्यसेन्निर्जितेन्द्रियः।

अत्र किञ्चन प्राधान्यं विद्यते। सगर्भप्राणायामं उत सबीजप्राणायामं एव भागवते उपन्यस्यते। साधकः प्राणायामान् कुर्वाणः मनसि त्रिवृद्ब्रह्माक्षरं (प्रणवम्) जपन् तिष्ठेत्। नैरन्तर्येण ब्रह्माक्षरमुच्चरन् प्राणवायुं निर्जित्य मनसः निग्रहणं कुर्यादित्याशयः। यथोक्तम् -

अभ्यसेन्मनसा शुद्धं त्रिवृत् ब्रह्माक्षरं परम्।
मनो यच्छेत् जितश्वासो ब्रह्मबीजमनुस्मरन्।। (२-१-१७)

बिसोर्णवत् दीर्घात् दीर्घातरमविच्छिन्नतया प्रणवरूपमोङ्कारं चिन्तयन् क्रमेण प्रणवं प्राणैरुदीर्य घण्डानादवत् उपर्युपरि प्रणवस्वरं संवेशयेत्। अनेन विधिना त्रिषवणं दशकृत्वोभ्यस्तप्राणायाम एकमास्यभ्यन्तरे एव प्राणवायुं सर्वथा वशीकर्तुं साधकः प्रभवति। उक्तञ्च -

हृद्यविच्छिन्नमोङ्कारं घण्डानादं बिसोर्णवत्।
प्राणेनोदीर्य तत्राथ पुनः संवेशयेत् स्वयम्।। (११-१४-३४)

वाय्वग्निभ्यां ध्मातं लोहं यथा स्वकीयं मालिन्यं परित्यजति तथैव सगर्भगतप्राणायामाभ्यासवशात् योगी जितश्वासः सन् प्राणवायुं जयति। तस्य रजस्तमोगुणानां शीघ्रं

विनाशः तथा मनसः शुद्धिश्च। तथोक्तम् -
मनोऽचिरात् स्यात् विरजं जितश्वासस्य योगिनः।
वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्।।
रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः।
यच्छेद्धारणया धीरः हन्ति या तत्कृतं मलम्।।

एवं चित्तस्य निर्मलिनीकरणार्थमेव प्राणायाम इति भागवतकारस्य आशयः। उक्तञ्च - 'प्राणायामैः दहेद्दोषान्'।

प्रत्याहारः - 'प्रत्याहारश्चेन्द्रियाणां विषयान् मनसा हृदि'। मनसा बुद्धेः साह्येन इन्द्रियाणां तत्तद्विषयेभ्यः प्रत्याहरणमेव अष्टाङ्गयोगस्य पञ्चमाङ्गः प्रत्याहारः। आसनस्य अभ्यासवशात् साधकः जितश्वासः सम्भवति। ततः स स्वानीन्द्रियाणि तत्तद्विषयेभ्यो बलात् नियच्छेत्। तत्र निश्चयात्मिकया बुद्ध्या संवलितं मनो भृशं साहाय्यमाचरति। मनसा तथा बुद्धेश्च साह्येन साधकः स्वकीयानीन्द्रियाणि विषयेभ्यः प्रत्याहृत्य एकस्मिन् स्थाने विनियोजयितुं शक्यते। यथोक्तम् -
नियच्छेत विषयेभ्योऽषान् मनसा बुद्धिसारथिः।
मनोदुष्टमसत्पथं बुद्ध्या युञ्जीत।।
इन्द्रियाणीन्द्रियार्थेभ्यो मनसाकृष्य तन्मयः।
बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः।।
प्रत्याहारेण विषयेन्द्रियसंयोगजन्यसंसर्गकृतदोषान् दूरीकर्तुं शक्यते। उक्तञ्च 'प्रत्याहारेण संसर्गान्' इति।

धारणा - अष्टाङ्गयोगस्य षष्ठः भागो भवति धारणा। धारणाध्यानसमाधयः अन्तरंगसाधनानीति पातञ्जलभाष्ये। एकस्मिन्नेव वस्तुनि बुद्ध्या मनसः च संधारणं धारणा इत्युच्यते। धारणास्वरूपं भागवते द्विविधा प्रतिपादिता।

१. विराड्स्वरूपविषयिणी धारणा।
२. अन्तर्यामि श्रीकृष्णस्वरूपविषयिणी धारणा।

विराड्स्वरूपविषयिणी धारणा

अस्यां धारणायां जगति यत् किञ्चित् कथञ्चित् क्वचित् कदाचित् आसीत् भविष्यति वा तत्सर्वं भगवतः स्थूलात् स्थूलतरं विराड्स्वरूपं भवति। 'सर्वं पुरुष एवेदम्' इति पुरुषसूक्तोक्तस्वरूपं भागवते एवं विशदयति।

'सर्वं पुरुषएवेदं भूतं भव्यं भवच्च सत्'
पश्यन्त्यदो रूपमदभ्रचक्षुषा
सहस्रपादोरुभुजाननाद्भुतम्।

सहस्रमूर्धश्रवणाक्षिनासिकं
सहस्रमौल्यंबरकुण्डलोल्लसत्।।

अयं विराड्देहः स्थविष्ठः। आकाशजलवाय्वग्निमहत्तत्त्वाहङ्कारप्रकृतिभिः सप्तावरणैः समावृतेऽस्मिन् ब्रह्माण्डशरीरे यः विराड्पुरुषः अस्ति स एव अस्याः प्रथमधारणायः आश्रयः तस्मिन् वैराजे पुरुषे धारणा क्रियते। उक्तञ्च -
आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते।
वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः।। (२-१-२५)
ततस्वरूपं तु तत्र विस्तरेण प्रतिपाद्यते। यथा -
पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जंघे।। इति।

विराड्पुरुषस्य पादमूलं पातालं, पार्ष्णिप्रपदे रसातलं, गुल्फौ महातलं, जङ्घे तलातलं, जानुनि सुतलम्, ऊरुद्वयं वितलमतलं, जघनं महीतलं नाभिराकाशः उरोऽनीकं ज्योतिः ग्रीवा महर्लोकः वदनं जनलोकः ललाटः तपोलोकः शीर्षाणि सत्यलोकः इन्द्रादयोः देवाः बाहवः दिशः कर्णौ शब्दः श्रोत्रं अश्विनौ नासाच्छिद्रौ, गन्धो घ्राणेन्द्रियम्... इत्येवं विवृणोति। (२-२३-३७) मुमुक्षवो साधकाः अस्मिन् वैराजपुरुषस्य स्थविष्ठस्वरूपे बुद्ध्या मनांसि धारयन्ति। स्थूलत्वात् सारल्येन मनसो धारणा स्थिरीकर्तुं शक्यते।

अन्तर्यामि श्रीकृष्णस्वरूपविषयिणी धारणा

'श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि' इति पद्मपुराणोक्त्या अस्य पुराणस्य श्रीकृष्णस्वरूपत्वं युक्तम्। तत्स्वरूपं अत्यन्तं चमत्कारेणास्मिन् नयनगोचरी भवति। यथा द्वितीयस्कन्धस्य द्वितीयाध्याये (२-८-१२) तृतीयस्कन्धस्य अष्टाविंशतितमे अध्याये एकादशस्कन्धस्य चतुर्दशेऽध्याये च वर्णना अत्यन्तरुचिरा भवति। अस्या धारणायाः यादृशी वर्णना भागवते विद्यते तादृशी नान्यत्रेति विद्वदभिप्रायः। आदौ हृदयस्य कमलकल्पना। कमलमिदं ऊर्ध्वमुखम् अधोनालम् च। अष्टदलयुक्तमिदं कमलम्। इदं अष्टदलं सकर्णिकं हृदयकमलं विकसितविकसितमूर्ध्वमुखं ध्यायेत्। कर्णिकाया सूर्याचन्द्रमसौ अग्निञ्च धारणया संन्यसेत्। अग्निमध्ये श्रीकृष्णस्य ध्यानमङ्गलं स्वरूपं चिन्तयेत्। यथा -
हृत्पुण्डरीकमन्तस्थं ऊर्ध्वनालमधोमुखम्
ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम्।
कर्णिकायां न्यसेत् सूर्यसोमाग्नीनुत्तरोत्तरम्
वह्निमध्ये स्मरेत् रूपं ममैतद् ध्यानमङ्गलम्।।

समं प्रशान्तं सुमुखं दीर्घचारुचतुर्भुजम्।
सुचारुसुन्दरग्रीवं सुकपोलं शुचिस्मितम्।।
समानकर्णविन्यस्तस्फुरन्मकरकुण्डलम्।
हेमाम्बरं घनश्यामं श्रीवत्सश्रीनिकेतनम्।।
शंखचक्रगदापद्मवनमालाविभूषितम्।
नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतम्।।
द्युमत्किरीटकटककटिसूत्राङ्गदायुतम्।
सर्वाङ्गसुन्दरं हृद्यं प्रसादसुमुखेक्षणम्।
सुकुमारमभिध्यायेत् सर्वाङ्गेषु मनो दधत्।

इदं श्रीकृष्णस्वरूपं यावत्कालपर्यन्तं मनो धारणया तिष्ठेत् तावत्कालपर्यन्तं धारणया अभिध्यायेत्। तत्स्वरूपे अङ्गानि क्रमश एकैकशो धिया भावयेत्। चरणकमलयोः समारभ्य स्मितं यावत् धारणां कुर्यात् इति क्रमेण यदैकैकमङ्गं धारणया जितं भवति तदा तस्याः परं परमङ्गमभिधारणीयमिति निष्कर्षः। साधकः स्वस्वरुचिभावनानुसारं स्थितं व्रजन्तं आसीनं शयानं वा स्वरूपं अन्तर्यामितया शुद्धभावेन मनोधारणया ध्यायेत् इति निर्देशः। धारणया मनोमालिन्यनाश एव प्रयोजनम्। चञ्चलमनसः परमप्रेमस्वरूपधारणात् किल्बिषान् दूरीकर्तुं शक्यते इति भावः। उक्तञ्च 'धारणाभिश्च किल्बिषान्' इति। (३. २८. ११)

ध्यानम् - तत्र प्रत्ययैकतानता ध्यानमिति ध्यानलक्षणम् पतञ्जलिना निर्दिष्टम्। यदा ध्यानविषये मनसः इन्द्रियाणां च एकतानता तदा ध्यानमित्यर्थः। भगवतः सम्पूर्णस्य शरीरस्य धारणा सर्वथा निश्चलां प्रपद्यते तदा कस्याप्येकस्याङ्गस्य चिन्तनं तथा प्रेक्षणञ्च ध्यानमिति कथ्यते। भगवत्स्वरूपवर्णनं भागवते अनन्यमाधुर्येण चित्ताकर्षकं विद्यते। यथा -

सञ्चिन्तयेत् भगवतश्चरणारविन्दं
वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम्।
उत्तुङ्गरक्तविलसन्नखचक्रवाल-
ज्योत्स्नाभिराहतमहद्धृदयान्धकारम्।।

एतादृशध्यानाभ्यासेन साधकः तस्मिन् भगवति भावं वध्नाति। तदा तस्य हृदयं भक्त्या द्रवीभवति। उक्तञ्च

भक्त्या द्रवद्धृदयउत्पुलकप्रमोदात्

शनैः शनैः चित्तस्य साधनमपि ध्येयाद् वियुङ्क्ते। यथा तैलस्याभावे दीपशिखा स्वे कारणे तेजसि विलीयते तथा आश्रयविषयरागादीनामभावे साधकस्य प्रशान्तं मनः ब्रह्माकारतामापद्यते। उक्तञ्च -

ध्यानेनेत्थं सुतीव्रेण युञ्जतो योगिनो मनः।
संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः।। (११-१४-४६)

साधकः ध्यानेन गुणप्रवाहरूपदेहाद्युपाधौ निवृत्तः ध्यातृध्येयादिविकल्परहितः सन् परमात्मानमेव सर्वानुगमीक्षते। भागवतोक्तेनेनाभ्यासविधिना परमात्मतत्त्वसाक्षात्कारे सति यो भक्तयोगी साधकः पूर्वं अज्ञानवशात् स्वात्मनि कर्तृत्वभोक्तृत्वादिकं अन्वभूत् स एव भोक्तृत्वादिकं अविद्याकृतमाहङ्कारिकं पश्यति। तदेव ध्यानलाभः।

समाधिः - अष्टाङ्गयोगस्यान्तिममङ्गं भवति समाधिः। यथा भक्तिप्रवणतया हृदयमार्द्रमुत्पुलकितं सत् द्रवीभवति यदा मन उत्कण्ठया विरमति, सत्वमुद्रिक्तं भवति, कम्पस्वेदाश्रुप्रभृतीनि सात्विकचिह्नानि प्रतिक्षणं शरीरे प्रादुर्भवन्ति तदा भक्तस्य हृदयं ध्येयपदार्थात् पृथक् भवति। यथा मीने मृते सति बडिशं पृथक्क्रियते तथा। संसाराश्रयी जीवः तदाश्रयः तदानीं परिहीयते। एतादृशसाधकः स्वात्मानं न कर्तृत्वेनाभिमन्यते। उक्तञ्च -

वाग् गद्गदा द्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसति क्वचिच्च।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति।। (११-१४-२४)
पूर्वं गृहीतं गुणकर्मचित्र-
मज्ञानमात्मन्यविविक्तमङ्गः।
निवर्तते तत् पुनरीक्षयैव
न गृह्यते नापि विसृज्य आत्मा। (११-२८-३३)
योगचर्यामिमां योगी आचरन् मदपाश्रयः।
नान्तरायैर्विहन्येत निस्पृहः स्वसुखानुभूः।। इति। (११-२८-४४)

उपसंहारम्

भागवतपुराणीयअष्टाङ्गयोगसाधना भक्तितत्त्वेन संबद्धा भवति। न केवलं योगाभ्यासं करोति तादृशः साधकयोगी अपि तु भगवद्भक्त्या सर्वदा तस्य हृदयं समाप्लावितं तिष्ठति। स एव परमभागवत इति कथ्यते। योगविद्यायाः फलं न सिद्धिः किन्तु भगवत्परायणत्वमेव। भक्तिं विहाय ब्रह्मसाक्षात्कारस्य अपरोक्षानुभूतेः न कोऽप्यन्य उपायः। उक्तञ्च -

न युज्यमानया भक्त्या भगवत्यखिलात्मनि।
सदृशोऽस्ति शिवः पन्थाः योगिनां ब्रह्मसिद्धये।। (३- २५ - १९)

एवंभक्तियुक्तया अष्टाङ्गयोगवर्णनया भक्तेः महत्वं प्रस्तुत्य अद्वैताभिमतब्रह्मज्ञानाय तन्महत्वं प्रमाणयति श्रीमद्भागवतमहापुराणम् इति अनुमीयते।

•...•